# Vishokalalitavratanirupanam

# વિશોકાલલિતાવ્રતનિરૂપણમ્

## Document Information

Text title : Vishokalalitavratanirupanam

File name : vishokAlalitAvratanirUpaNam.itx

Category : devii, devI, lakShmInArAyaNIyasaMhitA, lalitA

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 3 | adhyAya 139/1-38||

Latest update : April 12, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 12, 2026

*sanskritdocuments.org*

# વિશોકાલલિતાવ્રતનિરૂપણમ્

શ્રીનારાયણીશ્રીરુવાચ ।
આગતાનાં હિ શોકાનામપનોદાર્થમેવ યત્ ।
વ્રતં સ્યાત્તત્કથયાઽત્ર દયયા મે હરે પ્રભો ॥ ૧॥

શ્રીપુરુષોત્તમ ઉવાચ ।
પુણ્યે ચાશ્વયુજે માસિ શુક્લે દ્વાદશિકાવ્રતમ્ ।
શોકનાશાર્થમેવાઽસ્તિ વિશોકદ્વાદશીવ્રતમ્ ॥ ૨॥

દશમ્યાં લઘુભુગ્ભૂત્વા પૃથ્વીશયનમાચરેત્ ।
બ્રહ્મચારી ભવેચ્ચાપિ પ્રાતરુત્થાય માં સ્મરેત્ ॥ ૩॥

સ્નાત્વા સમ્પૂજયેન્માં ચૈકાદશ્યાં વ્રતમાચરન્ ।
નિરાહારઃ ફલાહારશ્ચૈકભોજી ચ વા ભવેત્ ॥ ૪॥

અશોકલલિતાં સ્વર્ણમયીં શ્રીકૃષ્ણશોભિતામ્ ।
કારયિત્વા પૂજયિત્વા ભોજયિત્વા ગજાસને ॥ ૫॥

સ્વાપયેજ્જાગરં કુર્યાન્મણ્ડપે કદલીકૃતે ।
દ્વાદશ્યાં પ્રાતરુત્થાય સ્નાત્વા સમ્પૂજયેત્પુનઃ ॥ ૬॥

સ્નાનં સર્વૌષધૈઃ કુર્યાત્ પઞ્ચગવ્યજલૈરપિ ।
પીતામ્બરધરો લક્ષ્મીં પૂજયેચ્છ્રીશમુત્પલૈઃ ॥ ૭॥

વિશોકાયૈ નમઃ પાદૌ વરદાયૈ તુ જઙ્ઘયોઃ ।
જાન્વોઃ શ્રિયૈ નમશ્ચાપિ સક્થ્નોરબ્ધિજયોષિતે ॥ ૮॥

ગુહ્યે વિશોકકર્ત્ર્યૈ ચ કટ્યાં માયૈ નમો નમઃ ।
ઉદરે પોષયિત્ર્યૈ ચ નમો ભાયૈ ચ પાર્શ્વયોઃ ॥ ૯॥

નાભૌ નમઃ સર્વધાત્ર્યૈ હૃદયેઽર્ધાશ્રિયૈ નમઃ ।
કણ્ઠે વાણ્યૈ નમો વક્ષઃસ્થલે કાન્તાશ્રિયૈ નમઃ ॥ ૧૦॥

બાહ્વોર્નમો રક્ષયિત્ર્યૈ લલિતાયૈ તુ હસ્તયોઃ ।
ચાન્ધ્યૈ મુખે નમશ્ચાપિ કમલાયૈ તુ નેત્રયોઃ ॥ ૧૧॥

નાસાયાં સુરભિદેવ્યૈ લલાટે મોહિનીશ્રિયૈ ।
કર્ણયોર્વ્યાપિકાયૈ તે નમો મૂર્ધ્નિ મહાશ્રિયૈ ॥ ૧૨॥

મણ્ડલે સ્થણ્ડિલે લક્ષ્મીપ્રતિમાસન્નિધૌ હરિમ્ ।
સ્વર્ણમૂર્તિં પૂજયેચ્ચ શ્રીપતિં માં વિશોકિનમ્ ॥ ૧૩॥

નમોઽનાદિકૃષ્ણનારાયણાય પાદયોર્નમઃ ।
નમઃ કૃષ્ણાય કાન્તાય જઙ્ઘયોસ્તે નમો નમઃ ॥ ૧૪॥

નમઃ શ્રીવાસુદેવાય જાન્વોસ્તે ચ નમો નમઃ ।
નમો નારાયણાયેતિ સક્થ્નોસ્તે ભગવન્નમઃ ॥ ૧૫॥

નમશ્ચાનન્દરૂપાય મેઢ્રે તે ચ નમો નમઃ ।
નમઃ કટ્યાં નરનારાયણાય તે નમો નમઃ ॥ ૧૬॥

ઉદરે તે નમો વિશ્વમ્ભરાય ભગવન્નમઃ ।
પાર્શ્વયોઃ રામકૃષ્ણાભ્યાં નમો નમઃ નમો નમઃ ॥ ૧૭॥

નાભૌ તે પદ્મનાભાય હૃદયે હંસયોગિને ।
કણ્ઠે તે નીલકણ્ઠાય વક્ષસિ બ્રહ્મણે નમઃ ॥ ૧૮॥

બાહ્વોશ્ચક્રધરાયાઽપિ કરયોઃ શઙ્ખધારિણે ।
મુખે રૂપાભિરૂપાય નેત્રયોઃ કમલાક્ષિણે ॥ ૧૯॥

નાસાયાં સર્વગન્ધાય લલાટે ગુરુરૂપિણે ।
કર્ણયોઃ શ્રુતિકર્ત્રે તે નમો મૂર્ધ્નિ શિખાવતે ॥ ૨૦॥

ઇત્યભ્યર્ચ્યાઽપિ ગોવિન્દં ફલમાલ્યાનુલેપનૈઃ ।
શૂર્પં સંસ્થાપ્ય પુરતો લક્ષ્મીં માં તત્ર સન્ન્યસેત્ ॥ ૨૧॥

નમો મોક્ષપ્રમોદાનાં દાતૃભ્યાં સર્વસમ્પદામ્ ।
નમઃ શોકપરિહારકર્તૃભ્યાં સર્વદા નમઃ ॥ ૨૨॥

વિશોકૌ દુઃખનાશાય વિશોકૌ વરદૌ ચ મે ।
વિશોકૌ મમ સમ્પત્ત્યૈ વિશોકૌ સર્વસિદ્ધયે ॥ ૨૩॥

ભવતાં મમ શોકાનાં સર્વેષાં નાશકૌ પ્રભૂ ।
શુક્લામ્બરૈઃ સમાવેષ્ટ્ય શૂર્પં સમ્પૂજયેત્ ફલૈઃ ॥ ૨૪॥

વસ્ત્રૈર્નાનાવિધૈસ્તદ્વત્ સુવર્ણકમલેન ચ ।
પૂજયિત્વા ભોજયેચ્ચ દુગ્ધપાકાદિકં શુભમ્ ॥ ૨૫॥

ત્રિકાલં પૂજયેચ્ચાપિ કમલૈર્ભોજયેદપિ ।
રજન્યાં ચ વ્રતી શીતં દર્ભોદકં પિબેચ્છુચિ ॥ ૨૬॥

તતસ્તુ જાગરં ગીતનૃત્યવાદ્યાન્વિતં ચરેત્ ।
પ્રાતઃ પ્રપૂજયેલ્લક્ષ્મીમશોકાં શ્રીપતિં તથા ॥ ૨૭॥

દમ્પતીં પૂજયેચ્ચાપિ વિપ્રાણાં વિધિના તતઃ ।
વસ્ત્રભૂષાભોજ્યપાત્રશ‍ૃઙ્ગારશાટિકા દિશેત્ ॥ ૨૮॥

ધનદાનાનિ રત્નાનાં ધેનૂનામર્પણાનિ ચ ।
યથાશક્તિ પ્રકુર્યાચ્ચ ભોજયેદ્બાલબાલિકાઃ ॥ ૨૯॥

સાધૂન્ સાધ્વીર્ભોજયેચ્ચ દદ્યાદન્નાનિ સર્વતઃ ।
પરિહારં પ્રકુર્યાચ્ચ દક્ષિણઃ પ્રદિશેત્તથા ॥ ૩૦॥

અનેન વિધિના કુર્યાદ્વિશોકાલલિતાવ્રતમ્ ।
વિશોકાદ્વાદશીરૂપં શોકા નશ્યન્તિ તસ્ય વૈ ॥ ૩૧॥

ધેનુદાનં સોપધાનશય્યાદાનં ધનાર્પણમ્ ।
પ્રકુર્યાચ્ચ લલિતાશ્રીલક્ષ્મીં સ્તુવીત ભાવતઃ ॥ ૩૨॥

યથા ન લક્ષ્મીઃ સમ્પચ્ચ માં પરિત્યજ્ય ગચ્છતિ ।
તથા સુરૂપતાઽઽરોગ્યમશોકઃ સન્તુ મે સદા ॥ ૩૩॥

યથા ભક્તિર્ભવેદગ્ર્યા શ્રીકૃષ્ણવલ્લભે મમ ।
યથા કૃષ્ણો બાલકૃષ્ણઃ સલક્ષ્મીકો મમ ગૃહે ॥ ૩૪॥

સદા વસેત્તથા શૂર્પલક્ષ્મીદાનં કરોમિ ચ ।
સુવર્ણકમલં રમ્યં કરવીરં ચ કુઙ્કુમમ્ ॥ ૩૫॥

કેતકીં સિન્દુવારં ચ મલ્લિકાં કેસરં તથા ।
કજ્જલં ચાઽલક્તકં ચ ચન્દનં ચ કદમ્બકમ્ ॥ ૩૬॥

રઞ્જનં ગન્ધિતૈલં ચ ગન્ધસારં દદામિ ચ ।
સર્વશ‍ૃઙ્ગારપુષ્પાણિ દદામિ સૌખ્યહેતવે ॥ ૩૭॥

પઠનાચ્છ્રવણાચ્ચાપિ સ્મરણાત્કરણાદપિ ।

ભુક્તિર્મુક્તિર્ભવેદેવ વિશોકલલિતાવ્રતાત્ ॥ ૩૮॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાઃ દ્વાપરયુગસન્તાનાત્મકસ્ય તૃતીયખણ્ડે
૧૩૯-અધ્યાયાન્તર્ગતં વિશોકાલલિતાવ્રતનિરૂપણં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૩। અધ્યાય ૧૩૯/૧-૩૮॥

lakShmInArAyaNIyasaMhitA . khaNDa 3. adhyAya 139/1-38..

Proofread by PSA Easwaran

*Vishokalalitavratanirupanam*
pdf was typeset on April 12, 2026

Please send corrections to *sanskrit@cheerful.com*